प्रकर्षः प्राधान्यभवने अक० “इदं तु मम दीनस्य मनोभूयः प्रकर्षति” रामा० सु० १,१,

सम्+ सम्यक्कर्षणे सक० सङ्कर्षणम् । [समाकर्षी ।

सम्+आ+सम्यक्तया दूरपर्य्यन्तनयने सक० । समाकर्षति

कृषधातुर्न्यादिपाठात् द्विकर्म्मकः । कर्षणञ्च भूमिसंयोजनेन बलेन देशान्तरसंयोगानुकूलव्यापारानुकूलव्यापारः तेनास्य द्विव्यापारबोधकतया द्विकर्म्मकत्वम् । ग्राममजां कर्षति इत्यादौ अकथितञ्चेत्यादि पा० अजादेः कर्म्मत्वम् । अत्र प्रधाने कर्म्मण्येव वाच्ये लकारादयः । “प्रधाने नीकृषवहाम्” भर्त्तृहर्य्युक्तेः । अजा ग्रामं कृष्यते । विलेखनञ्च विदारणं तदर्थे न द्विकर्म्मकतेति भेदः

कृषक त्रि० कृष–क्वुन् । १कर्षके कृषिशब्दे उदा० । २फाले न० मेदि० । ३वृषे पु० हेम० ।

कृषर न० कृष–करन् । कृशरशब्दार्थे पृषो० कृसरोऽप्यत्र केचित्

कृषाण त्रि० कृष–बा० आनक् । कर्षके कृषिशब्दे उदा०

कृषि स्त्री कृष–इक् । शस्योत्पादनार्थं भूमिकर्षणरूपे वैश्यवृत्तिभेदे अमरः कृषिकर्म्मप्रकारादि कृषिपराशरे दर्शितं यथा तत्रादौ कृषिप्रशंसा “चतुर्व्वेदान्तगो ब्रह्मा ब्रवीति कृपणं वचः । अलक्ष्म्या युज्यते सोऽपि प्रार्थनालाघवान्वितः । एकयैव पुनः कृष्या प्रार्थको नैव जायते । कृष्यान्वितो हि लोकेऽस्मिन् भूयादेकस्य भूपतिः । सुवर्णरौप्यमाणिक्यवसनैरपि पूरिताः । तथापि प्रार्थयन्त्येव कृषकान् भक्ततृष्णया । कण्ठे हस्ते च कर्णे च सुवर्णं यदि विद्यते । उपवासस्तथापि स्यादन्नाभावेन देहिनाम् । अन्नं प्राणा बलञ्चान्नमन्नं सर्व्वार्थसाधकम् । देवासुरमनुष्याश्च सर्व्वे चान्नोपजीविनः । अन्नन्तु धान्यसम्भूतं धान्यं कृष्या विना न च । तस्मात् सर्वं-परित्यज्य कृषिं यत्नेन कारयेत् । कृषिर्धन्या कृषिर्मेध्या जन्तूनां जीवनं कृषिः । हिंसादिदोषयुक्तोऽपि मुच्यतेऽतिथिपूजनात् । तेनार्च्चितं जगत् सर्व्वमतिथिर्येन पूजितः । अर्च्चितास्तेन देवाश्च स एव पुरुषोत्तमः” ।

अथ कृषेः स्वयमवेक्ष्यतोक्तिः “फलत्यवेक्षिता स्वर्णं, दैन्यं सैवानवेक्षिता । कृषिः कृषिपुराणज्ञ इत्युवाच पराशरः” । अथ चान्ये मुनयश्चाहुः “पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् । गोषु चात्मसमं दद्यात् स्वयमेव कृषिं व्रजेत् । कृषिर्गावो वाणविद्याः स्त्रियो राजकुलानि च । क्षणेनैवावसीदन्ति मुहूर्त्तमनवेक्षणात् । समर्थैश्च कृषिः कार्य्या लोकानां हितकाम्यया असमर्थो हि कृषको भिक्षामटति नीचवत् । गोहितः क्षेत्रगामी च कालज्ञो वीजतत्परः । वितन्द्रः सर्व्वशस्याढ्यः कृषको नावसीदति” ।

अथ वाहपोषणादिप्रकारः । “कृषिञ्च तादृशीं कुर्य्यात् यथा वाहान्न पीड़येत् । वाहपीडार्जितं शस्यं गर्हितं सर्वकर्म्मसु । वाहपीडार्जितं शस्यं फलितञ्च चतुर्गुणम् । वाहनिश्वासविफलः कृषको निःस्वतां व्रजेत् । गुण्डकैर्यवसैर्भूसैस्तथान्यैरपि पोषणैः । वाहाः क्वचिन्न सीदन्ति सायं प्रातश्च चारणात्” ।

अथ गोशालाविधानम् । “गोशाला सुदृढ़ा यस्य शुचिर्गोमयवर्जिता । तस्य वाहा विवर्द्धन्ते पोषणैरपि वर्जिताः । शकृन्मूत्रविलिप्ताङ्गा वाहा यत्र दिने दिने । निःसरन्ति गवां स्थानात् तत्र किं पोषणादिभिः । पञ्चपञ्चायता शाला गवां वृद्धिकरी मता । सिंहस्थाने कृता सैव गोनाशं कुरुते ध्रुवम् । सिंहगेहेऽर्पितां चैव गोशालां कुरुते यदि । प्रमादान्मन्दबुद्धित्वात् गवां नाशो भवेत्तदा । तण्डुलानां जलञ्चैव तप्तमण्डं झषोदकम् । कार्पासास्थितुषञ्चैव गोस्थाने गोविनाशकृत् । सम्मार्ज्जनीञ्च मुसलमुच्छिष्टं गोनिकेतने । कृत्वा गोनाशमाप्नोति तथा तत्राजबन्धने । गोमूत्रजालकेनैव तत्रावस्करमोचनम् । कुर्व्वन्ति गृहमेधिभ्यस्तत्र का वाहवासना । विलम्बिं गोमयस्यापि रविभौमशनेर्दिने । न कारयेत् भ्रमेणापि गोवृद्धिं यदि वाञ्छति । वारत्रयं परित्यज्य दद्यादन्येषु गोमयम् । विलम्ब्य शनिभौमेषु गवां हानिकरः स्मृतः । श्लेष्ममूत्रपुरीषाणि पङ्कानि च रजांसि च । न पतन्ति गवां यत्र तत्र लक्ष्मीः स्थिरा भवेत् । सन्ध्याकाले च गोस्थाने दीपो यत्र न दीयते । स्थानं तत् कमलाहीनं वीक्ष्य क्रन्दन्ति गोगणाः । हलमष्टगवं धर्म्म्यं षड्गवं व्यवसायिनाम् । चतुर्गवं नृशंसानां द्विगवञ्च गवाशिनाम् । नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम् । नित्यञ्च त्रिहले भक्तं नित्यमेकहले ऋणम् । आत्मपोषणमात्रन्तु द्विहलेन च सर्व्वदा । पितृदेवातिथीनाञ्च पुष्ट्यर्थं सोऽक्षमो भवेत् ।

अथ गोपर्वकथनम् “गोपूजां कार्त्तिके कुर्य्यात् लगुड़प्रतिपत्तिथौ । बद्ध्वा श्यामलतां स्कन्धे लिप्त्वा तैलहरिद्रया । कुङ्कुमैश्चन्दनैश्चापि कृत्वा चाङ्गे विलेपनम् । उद्यम्य लगुडं हस्ते गोपालाः कृतभूषणाः । ततो वाद्यैश्च